यत्वं उक्तं साधयति पुरुषेति मरणं महाप्रस्थानमित्यादि कर्मफलत्वाजीवदवस्थायामेवमहाभारताद्विविधि
धानं दृष्टमतो ऽर्थानर्थयोरभिप्रायकत्वे वेत्यर्थः कर्मविधीनामात्मज्ञानाप्रधानत्वं प्रतिपादितमुपसंहरति नु
स्मादिति तथापि प्रकृतेन किमायातं तत्राह यस्मादिति तत्र प्रमाणमाह दृश्यत इति अतः शब्दार्थं स्फुटयति कर्मे
ति ज्ञानस्य कर्मविरोधित्वेन तन्निरपेक्षत्वे वा सिद्धे फलितमाह तस्मादिति आत्मज्ञानस्यामृतत्वे हेतुत्वाभ्युपगमादि

मोक्षमेकं वर्जयित्वा मरणाविद्याविषयत्वात् पुरुषाभिप्रायत्वेनोद्दार्थानर्थौ मरणादिकामो हि दर्शनात् न
स्याद्यावदात्मज्ञानविधेरभिमुख्यं तावदेव कर्मविधयः तस्मान्नात्मज्ञानसहभावित्वं कर्मणामिष्यत इति
हमात्मज्ञानमात्रमेवामृतत्वसाधनमेतावदरे खल्वमृतत्वमिति कर्मविधिनिरपेक्षत्वात् ज्ञानस्य अतो हि
दृष्टत्वा वा पारिव्राज्यं सिद्धं संप्रदानादिकर्मकारकजात्यादिशून्याविक्रियब्रह्मात्मदर्शनिपत्तिमात्रे
णाक्वनमनरेणाप्यकल्पयतः

सादेरुक्तन्यायादात्मसाक्षात्कारस्य कैवल्यस्य कैवल्यकारणत्वसिद्धेः सति तस्मिन् जीवन्मुक्तस्याक मानुष्ठाना
नवकाशात् दृष्टेन प्रवृत्तस्याधीनत्वे दर्शयति विदितपदपदार्थस्य परोक्षज्ञानवतस्तन्मात्रेणाप्रमाणापेक्षामन्तरेणापि
हं सर्वकर्मत्यागलक्षणं पारिव्राज्यमेष एवं विद्वत्तमामाप्तो न तु परोक्षज्ञानवतः प्रारब्धफलप्राप्तिमन्तरेणानुष्ठे
योऽस्ति विरक्तीतिभावः विद्वद्विषयत्वेनात्मसाक्षात्कारस्य कथं पारिव्राज्यं तत्राह वचनमिति उक्तन्यायः शास्त्रा
दिवचनस्य चित्तः विधिं विना फलभूतपारिव्राज्यमित्यर्थः

प्रसंगाज्जिज्ञासायां कर्मयोगेन शक्यते निषेद्धुमिति वदन् विविदिषासंन्यासं साधयति तथा ऐत्यादिना विदुषामात्मसा
क्षात्कारार्थिनां तत्त्वं एषणानिःसृप्य यतनामिति यावत् आत्मलोकस्यावबोधोऽपि कच्छ्रानहेतुः पाणेषणानिवृत्य एवमतीत र
हितमनुफलावस्थस्य कस्यानाद्यनुष्ठानायोगात् तदन्तरेणात्मप्रात्यभावाच्च उक्तं हि शमादिचतुष्टयं रतेर्यितत्वसाक्षा
त्कारेऽन्तरं साधनत्वं तदाह [illegible] चेति एतत्पारिव्राज्यमिति संबंधः उक्तमायः शान्तादिवाक्यस्थिताः विविदिषु
र्नामाधीतवेदो विचारप्रयोजकापातिकज्ञानवान्मुमुक्षुर्मोक्षसाधनं तत्त्वसाक्षात्कारमपेक्षमाणस्तस्मिन् प

[illegible]ास्यव्याख्यानमेतत् येषां नोऽयमात्मायं लोक इति हेतुवचनेन पूर्वे विद्वांसः प्रजामकामयमाना व्युत्थाय ती
ति पारिव्राज्यं विदुषामात्मलोकावबोधादेव तथा च विविदिषोरपि सिद्धं पारिव्राज्यमेतमेवात्मानं लोक
मिच्छन्तः प्रव्रजन्तीति वचनात् कर्मणां चाविद्याद्विषयत्वमवोचाम अविद्याविषये चोऽपनत्वं विकारसंस्का
रार्थानि कर्माणीत्यतः आत्मसंस्कारद्वारेणात्मज्ञानसाधनत्वमपि कर्मणामवोचाम यज्ञादिभिर्विविदि
षन्तीति

[illegible]त्यनिःसृत्येनापि भूयो विवक्षितः न त्वेकं पारिव्राज्यमत्र आहैतमेवात्मानमिति इतश्च विविदिषासं
न्यासोऽस्तीत्याह [illegible] णा चेति तथा च विद्याविरुद्धं गविद्यामिच्छन्नशेषाणि कर्माणि शरीरधारणमा
त्रकारणेतराणि त्यजेदिति शेषः विविदिषासंन्यासे हेत्वन्तरमाह अविद्याविषये चेति चतुर्विधफलानि कर्मा
णि अविद्याविषये परं संभवन्ति तत्त्वसाध्यवस्तु नीयते जिज्ञासायां त्याज्यानि तानीत्यर्थः कथं तर्हि कर्म
णामुत्तमफलान्वयस्तत्राह [illegible] ति शुद्ध्यशुद्धिद्वारा ज्ञानहेतुत्वात् कर्मणामस्ति प्रत्ययः इत्यापरमपुरु
षार्थान्वय इत्यर्थः

नृ॰भा॰ सन्यासः कर्मयोगश्चेति: श्रेयस्करावुभाविति स्मृतेर्विविदिषूणां मुमुक्षूणां कर्मपारिव्राज्यमेतद् कर्तव्य
मित्याशयेनाह [illegible]ति यथाविद्वत्सन्यासस्तथा विविदिषासन्यासोपि यथोक्तनीत्या संभावितमतो नियाव
त् आत्मज्ञानोत्पादकं प्रत्याश्रमधर्माणां बलाबलविचारणानामान्तरंगत्वबहिरंगत्वविज्ञानस्या
सामित्यर्थः अहिंसात्तेयब्रह्मचर्यादयोयमाः वैराग्यादीनाम्मित्यादिशब्देन शमादयो गृह्यन्ते स्त एवैतेय
मप्रधाना आश्रमधर्मा बहुनाक्लिष्टेन पापेन कर्मणासंकीर्णा हिंसादिप्राचुर्याद्यमाद्यन्तमुकुर्वा
णा नियमानुकेवलान् भजन्तीति स्मृतेस्तस्मात्पूर्वेषामन्तरंगत्वं उत्तरेषां बहिरंगत्व मित्याशयेनाह

अथैवं सत्यविहृद्विषयाणामाश्रमकर्मणां बलाबलविचारणायामात्मज्ञानोत्पादनं प्रति
यमनियमप्रधानानाममानित्वादीनां मानस्यानां च ध्यानज्ञानवैराग्यादीनां तपसां च कार
कत्वं हिंसारागद्वेषादिबाहुल्यात् बहुक्लिष्टकर्मविमिश्रितास्तत्र इत्यतः पारिव्राज्यं मु
ख्यं प्रशंसन्ति त्याग एव हि सर्वेषामुक्तानामपि कर्मणां वैराग्यं पुनरेतस्य त्यागस्य परमा
विधिः किं ते धनेन किमु बन्धुभिर्वा किं ते दारैर्ब्राह्मण यो मरिष्यसि आत्मानमन्विच्छ
गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च

[illegible]ति कर्मयोगापेक्षया तत्त्यागस्याधिकारिविशेषं प्रति प्रशस्तत्वमुपसंहरन्ति अत एव तत्त्यागस्य
प्रकारमेवाभिनयन्ति त्याग एवेति उक्तानामाश्रमैरनुष्ठेयत्वेनाविशेषः तत्त्यागे हेतुमाह वैराग्यमिति
मोक्षाय कर्मपरित्याग इत्यर्थः उत्तमपुरुषार्थिनः सन्यासद्वारा श्रवणादिकं तत्रापि सत्त्वं वाक्यं त
रमुदाहरन्ति [illegible]धनेनेति अथापि त्वादिभिर्गतं पन्थानमन्वेषयामि नात्मानमित्याशंक्याह पितामह
इति

विविदिषासंन्यासे सांख्यादिसम्मतिमाह चेति यथाहुः सांख्याः ज्ञानेन चापवर्गो विपर्ययाद्दिष्यते बंधः इति द्वितीयं
ख्यातिपर्यंतमन्तानाच्छिन्नविवेकज्ञानमिति तत्र अविपर्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानमिति च योगशास्त्रविदस्तु
आहुः अभ्यासवैराग्याभ्यां तन्निरोध इति तत्र वैराग्यं नाम विषयदोषदर्शनाद्रागनिवृत्तिः दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति
सांख्यानां तत्त्वज्ञानादि प्रसिद्धं इति दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यमिति इत्यत्र सम्य
सोऽज्ञानं प्रति प्रत्यासन्नत्वात् आह कामेति सन्न्यासिनः कामप्रवृत्त्यभावेऽपि कथं संन्यासस्य ज्ञानं प्रति प्रत्यासन्न
त्वमित्याशंक्याह कामप्रवृत्तेरिति इति नु कामयमानः काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो

एवं सांख्ययोगशास्त्रेषु च संन्यासो ज्ञानं प्रति प्रत्यासन्नस्तु अनेककामप्रवृत्त्यभावाच्च कामप्रवृत्तेर्हि ह
न्यन्ति कुलतां सर्वशास्त्रेषु प्रसिद्धा तस्माद्विरक्तस्य मुमुक्षोर्विनापि ज्ञानेन ब्रह्मचर्यादेव प्रव्रजेदिति
द्युपपन्नं ननु सावकाशत्वादनधिकृतविषयमेतदित्युक्तं यावज्जीवश्रुतेः परोधात् नैष दोषः
नितरां सावकाशत्वात् यावज्जीवश्रुतीनां अविद्वत्कामिकर्तव्यतां द्योतयामसेवं कर्मणां इम

महापापादिविद्योतनमिह वैराग्यमिसादीनि शास्त्राणि विविदिषासंन्यासमुपसंहरति तस्मादिति यथा
क्तसाधिकारिणो दर्शितः यावि धयाज्ञानेन विनापि संन्यासस्य प्राप्तत्वात् ब्रह्मचर्यादेवेत्यादिविधिवाक्य
मुपपन्नमिति योजना अथ पारिव्राज्यविधानमनधिकृतविषयमुच्यते तथापि सावकाशत्वं विहितानां
षयावज्जीवश्रुतिविरोधात्तस्याः निरवकाशत्वात् सावकाशनिरवकाशयोश्च निरवकाशस्यैव बलव
त्वादित्याशंक्य तन्निति यावज्जीवश्रुतेर्निरवकाशत्वं दूषयति नैष दोष इति कथमित्याशंक्य तस्या
काशत्वं तत्राह अविद्वदिति

७८

कृष्णा जीवनमात्रंनिमित्तीकृत्यचोदितंकर्मकथंकाम्यमित्याकांक्षायांतत्राह नित्यमिति प्रत्यवायपरिहारादेरित्यत्र आ
दित्यर्थः अनुष्ठानस्वरूपनिरूपणायामपिजीवनमात्रंनिमित्तीकृत्यकर्मकर्तव्यमित्याह प्रायेणेति
तथापिनित्येषुकर्मसुकामनाप्रनिमित्ताप्रवृत्तिस्तत्रकाम्यमानफलाभावादित्याशंक्याह कामश्चेति
प्रत्यवायपरिहारादेरपिकाम्यमानत्वफलत्वमितिभावः तथापिनित्यकर्मणिकाम्यमानफलादिरहिते
किंचिन्नश्चेतमित्याशंक्याह अनेकेति कर्मभिरनेकैः साधितैर्यत् दुरितनिबर्हणादिसाध्यं तदेवास्य
श्रुतमपिविद्ध्यृदेशसाधनंभवतीयद्यपिक्रतुनेजनुसंततकामस्यचेष्टितमिमितिस्मृतेस्तद्व्यतिर

अनिरपेक्षमेवजीवननिमित्तमेवकर्तव्यंकर्म प्रायेणहिपुरुषाःकामबहुलाःकामश्चानेकविषयोनेक
कर्मसाधनसाध्यश्च अनेकफलसाधनानिचवैदिकानिकर्माणिचाग्निसर्वपुरुषकर्तव्यानि
नःपुनश्चानुष्ठीयमानानिबहुफलानिकृत्यादिवत् वर्षशतसमाप्तीनिचगार्हस्थ्येवारण्येवा

केणप्रवृत्त्यनुपपत्तेरतोनित्येपिकाम्यमानंफलमस्तीत्यर्थः ननुवैदिकानांकर्मणांनियतफलत्वात्काम
पिनियतफलापुरुषकृतचानियतेषुनस्यावान्नकाम्यमानफलत्वमितितत्राहानेकफलेति अथ
नानिपुरुषमात्रकर्तव्यानीतिकुतोविवक्षितस्यप्राप्तमितित्तत्राह दारेति नन्वविरक्तेनाग्निगृही
एणमकृत्वेनाप्यनुष्ठेयानितावतानविधेश्चरितार्थत्वात्तयाचकथंफलबाहुल्यमित्याशंक्याह पुनः
पुनश्चेति यावज्जीवोपबंधात्स्वनिमित्तिमितिभावः नहियावज्जीवश्चजिवत्वादशेषाश्चमानुष्ठा
माश्वरणमग्निहोत्रादीनीतिकुतोपपद्योकस्यास्योपपत्तिरित्याशंक्याह वर्षशतेति

अविरक्तगृहिविषयत्वं श्रुतिमंत्रयोरित्युपसंहरन्नाह इति यत्तु यावज्जीवश्रुतेरपवादो विस्पष्टो [illegible] त्यथ

योरित्यन्यविकाम्यगृहिविषयत्वान्न ब्रह्मचर्यादेव प्रव्रजेदिति विद्या पवादकमित्याह तस्मिन्श्रुति पराक्ष

गम्यविरक्तविषयत्वात्सर्वस्य वेदस्य कर्मावसानत्वं द्योतयतीत्याह यस्मिन्श्रुति यावज्जीवश्रु [illegible] यत्न रम्य [illegible]

[illegible] नस्तद्पेक्षया यावज्जीवश्रुत्यनयः कुर्वन्नेवेह कर्माणीति मंत्रवर्णः नत्विं श्रुपक्षो विरुद्धं जिस्तदंम

ययोः कर्म परित्यागः यस्मिंस्तु पक्षे यावज्जीवानुष्ठानमन्यथा श्रवणानन्तत्वमस्मात्तत्ता चर्या एरस्परत्न र

वर्णापेक्षया च यावज्जीवश्रुतिः नहि क्षत्रियवैश्ययोः पारिव्राज्यप्रतिपादिरस्तित [illegible] मैवैयस्यादि

नो विधिरेका [illegible] श्रमंत्वाचार्यारत्येवमादीनां क्षत्रियवैश्यापेक्षत्वं

रैति कथं साक्षत्रियवैश्यविषयत्वेन प्रवृत्तात्रैवर्णिकानामपि पारिव्राज्यपरि गृहादित्या शंक्याह नष्ट

ति यावज्जीवश्रुतिवदेकाश्रम्यप्रतिपादकस्मृतीनामपि क्षत्रियादिविषयत्वमाह तथाति एम [illegible]

त्स्णा। श्रुतिस्मृतीनां कर्मणां संन्यासायोनाधिकृतविषयत्वे फलितमुपसंहरति तस्मादिति एतत्कारणकुं ज्ञानाद [illegible]
१०० धिकर्मण्यनधिकृता अनुग्राह्या एवं श्रुत्येति आहानधिकृतानां चेति तस्मामेव भार्याणां स्त्रीणां कामी [illegible]

तस्मात्पुरुषसामर्थ्यज्ञानवैराग्यकामा [illegible] द्यपेक्षयाक्रमान्विकल्पक्रमपारिव्राज्यमिति
पत्तिप्रकारेण विरुध्यते अनधिकृतानां च एवंविधानां पारिव्राज्यस्य ह्यानकोवाह्ना
तकोवोत्सन्नाग्निरनग्निकोवेत्यादिना तस्मात्सिद्धा यात्राश्रमान्तरेणाधिकृतानामेव १४
१५ षष्ठस्य पंचमं ब्राह्मणं

त्संनाग्निस्तस्यापि सर्वापरित्यक्ताग्निरनग्निकश्चेति भेदः आश्रमान्तरविषयश्रुतिस्मृतीनामनधिकृत [illegible]
विषयत्वाभावे सिद्धमर्थं निगमयति तस्मादिति षष्ठस्य पंचमं ब्राह्मणं एमरामरामरामरा

तदेवं विचारद्वारेणाक्षिप्तश्रुतीनामापाततो विरुद्धानामविरोधं प्रतिपाद्याथ वंशं तस्यार्थमाह अथेति सांगो
पांगस्य सफलस्यात्मविज्ञानस्य प्रवचनानन्तरं वंशं शास्त्रार्थमाहात्म्यं निरस्मिति यथा प्रथमान्तः शिष्यो गुरुस्तु पंचम्यन्तः
इति चतुर्थान्ते आख्यानं तथात्रापीत्याह आख्यानमिति गोविन्दभगवत्पूज्यपादशिष्यस्य परिव्राजकाचार्यस्य श्री
...याज्ञवल्कीयस्य काण्डस्य वंश आरभ्यते यथामधुकाण्डस्य वंशः आख्यानं तु पूर्ववत् ब्रह्मत्व

अथ वंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौ
शिकः कौण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः १ आग्निवेश्यादाग्नि
वेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो
गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनाय
नान्माध्यंदिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः २ घृतकौशिकाद्घृतकौ
शिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च
यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादा
त्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशो
र्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बा
भ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रादाभूति
स्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दै
वादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्य
ष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्म
स्वयंभु ब्रह्मणे नमः ॥ ३ ॥ इति बृहदारण्यकटीकायां षष्ठोऽध्यायः समाप्तः ॥ ६ ॥ केरभगवन्तः कृतायां बृहदारण्यकवार्तिकस्यागमापेक्षा...
यां ससंन्यासे सेतिकर्तव्यताकमात्मज्ञानममृतत्वसाधनं सिद्धमिति पश्यन्तु मिति शवः परिसमाप्तौ मंगलं चाचरति
होति इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यस्य भगवदानन्दज्ञानेन कृतायां बृहदारण्यकभा

शुभमस्तु संवत् ... शिवाश्रमे गलिखितमाश्री देशिकेंद्रात्मया ॥

इतिबृहदारण्यकभाष्यटीकायांचतुर्थोध्यायःसमाप्तः

बृ.भा.टी. [illegible]ायनमः पूर्वस्मिन्नध्याये ब्रह्मात्मज्ञानं सफलं सांगोपांगं वादन्यायेनोक्तमिदानीं कांडांतरमवतारि
५०२ रयति [illegible]र्णमिति पूर्वोऽध्यायेऽवसर्वस्य वक्तव्यस्य समाप्तत्वादखिलकांडारंभेणोऽस्याशंक्य पूर्वे ज्ञानं तत्प
रिशिष्टं खिलकाण्डं खिलशब्दवाच्यमस्तीत्याह [illegible]अध्यायचतुष्टयेनेति सर्वांतरत्वस्फुरदन्तिशेषः अमृतत्वसाधनं
निर्द्धारितमिति पूर्वेण संबंधः शब्दार्थादीत्यादिशब्देन मानमेयादिग्रहः ह्याशिष्टे दिग्भ्य उक्तानीति शेषः ओं
काराद्युपासनधर्मत्वेन विधित्सितं तन्मुखेनाक्रमेकं ज्ञानमनुवदति पूर्णमित्यादिना अवयवार्थमुक्त्वा सं

[illegible]मद इत्यादि खिलकांडमारभ्यते [illegible]अध्यायचतुष्टयेन यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरो निरु
पाधिकोऽशनायाद्यतीतो नेति नेतीति व्यपदेशो निर्द्धारितः यद्विज्ञानं केवलममृतत्वसाधनमथ तदेवा
त्मनः सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तान्युपासनानि कर्मभिरविरुद्धानि प्र
कृष्टाभ्युदयसाधनानि क्रममुक्तिभांजि च तानि वक्तव्यानीति परः संदर्भः सर्वोपासनशेषत्वेन ओंकारो द
मं दानं दयामित्येतानि च विधि ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते त्सितानि पूर्णमदः पू
न कुतश्चिद्व्यावृत्तं व्यापीत्येतत् सावकतेरिदंत्वा अद
इति परोक्षाभिधायि सर्वनाम तत्परं ब्रह्मेत्यर्थः तत्पूर्णमाकाशवद्व्यापि निरंतरं निरुपाधिकं च तदेवेदं सोपा
धिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव नोपाधिपरिच्छिन्नेन विशेषात्मनात
दिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मन उदच्यत उद्रिच्यत उद्गच्छतीत्येतत् यद्यपि कार्यात्म
नोद्रिच्यते तथापि यत्स्वरूपं पूर्णत्वं परमात्मभावं तन्न जहाति पूर्णमेवोद्रिच्यते एमएमएमएमएमभ

दावार्थमाह [illegible]पूर्णमिति अदः पूर्णमित्यनेन लक्ष्यं तत्पदार्थं दर्शयित्वा त्वंपदार्थं दर्शयति तदेवेति कथं सो
पाधिकस्य पूर्णत्वमित्याशंक्याह [illegible]नेति व्याप्त्वमाह नोपाधीति तत्पदमुपहितेन विशिष्टेन रूपेण पूर्ण
त्वं वर्णयामः किंतु केवलेन स्वरूपेणेत्यर्थः लक्ष्यौ तत्त्वंपदार्थावुक्त्वा तावेव वाक्येनैकयति तदिदमिति ए
कथं कार्यात्मनोद्रिच्यमानस्य पूर्णत्वमित्याशंका॥ यद्यपीति

लक्ष्यपदार्थैक्यज्ञानफलमुपन्यस्यति पूर्णस्येति उपक्रमोपसंहारयोरैकरूप्यमैक्यञ्च तात्पर्यलिंगं सं
गिरन्ते ... कमिति कथं पूर्णाकण्डिकायां ब्रह्मकण्डिकया सहैकार्थत्वेनैकवाक्यत्वमित्याशङ्कायां ब्रूते
रयति ... सादिना उपक्रमोपसंहारसिद्धं ब्रह्मात्मैक्यं कठश्रुतिः संवादयति तथा चेति ब्रह्मात्मनोरैक्यं उ

पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णं पूर्णत्वमादाय गृहीत्वात्मस्वरूपैकरसत्वमापद्य विद्यया अविद्याकृ
तं भूतमात्रोपाधिसंसर्गजमन्यथावभासं निरस्कृत्य पूर्णमेवानन्तरमबाह्यं प्रज्ञानघनैकरसस्वभा
वं केवलं ब्रह्मावशिष्यते ... कं ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेत्तस्मात्तत्सर्वमभवदित्येषोऽ
मन्त्रस्यार्थः ... ब्रह्मसस्यार्थः पूर्णमदः पूर्णमिदं पूर्णमिति ब्रह्म वा इदमग्र आसीदित्यस्यार्थः तथा च ...

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते

यान रंपरस्वेह नरमुत्रपरमुत्रनदन्विहेति अतोऽदःशब्दवाच्यं पूर्णं ब्रह्म नरदेवेदं पूर्णं कार्यस्थं ता
मरूपोपाधिसंयुक्तमविद्ययोद्रिक्तं तस्मादेव परमार्थस्वरूपात्स्यादिवज्जसवभासमानन्नद ...
वपरं पूर्णं ब्रह्म विदित्वाहमदः पूर्णं ब्रह्मास्मीत्येवं पूर्णमादाय निरस्कृत्यापूर्णस्वरूपतामविद्याकृतां
नामरूपोपाधिसम्पर्कजामेतयाब्रह्मविद्यया पूर्णमेव केवलम् वशिष्यते तथा चोक्तं तस्मात्तत्सर्वमभव

दिति

क्रमुपजीव्य वाक्यार्थमाहावशिष्यतेति पूर्णायन ब्रह्मेति यश्च वेद एवं सः उक्तमेवव्यनक्ति तस्मादेवेति संसारावस्था
दर्शयित्वा मोक्षावस्थां दर्शयति ब्रह्मात्मानमिति उक्तेविद्याफलवाक्योपक्रममनुकूलयति तथा चा

क्तमिति

बृ०भा नकेवलंब्रह्मस्वंइतिकृयेवास्यमंत्रस्येकत्तावयत्वंकिंतुसर्वाभिरुपनिषद्भिरित्याह यः सर्वोपनिषत्सु इतिअ री॰
६०३ नुवादफलमाह[illegible]रेति तदेवस्फुटयति ब्रह्मविद्येति तस्माद्यतोब्रह्मणोनुवाद इतिशेषः कथंनहि सर्वो
पासनशेषत्वेनविधित्सितत्वमोंकारादीनामुक्तमत आह एवलेति अद्वितीयंब्रह्मोक्तंस्वर्गप्रवर्तनशीलं
प्रलयावस्थंब्रह्मविसर्गस्थितिष्वपितु विशेषप्रवृत्तत्वस्यापवादत्वंतोद्वैतरूपंब्रह्मसर्वोपनिषद्यः तत्र ता॰है
ब्रह्मानेनमंत्रेणासंक्षिप्यतइतिभर्तृप्रपंचपक्षमुत्थापयति अत्रेत्यादिना कार्यकारणयोरित्यति का॰

[illegible] सर्वोपनिषत्सुयोब्रह्मसएषोनेनमंत्रेणानूद्यतेअत्रसंबंधार्थं ब्रह्मविद्यासाधनत्वेनहिवक्ष्यमा
णानिसाधनान्योंकारदमदानदयाख्यानिविधित्सितानि खिलप्रकरणसंबंधात्सर्वोपासनांगभू
तानिच[illegible]केवर्णयति पूर्णात्कारणात्पूर्णंकार्यमुद्रिच्यते उद्रिक्तंकार्यंवर्तमानकालेपिपूर्णमे
व परमार्थवस्तुभूतंद्वैतरूपेण पुनःप्रलयकालेपूर्णस्यकार्यस्यपूर्णतामादायात्मनिधित्वा पू
र्णमेवावशिष्यते कारणरूपमेवं उत्पत्तिस्थितिप्रलयेषुत्रिष्वपिकालेषुकार्यकारणयोःपूर्ण
तैव साचैकैवपूर्णताकार्यकारणयोर्भेदेनव्यपदिश्यते एवंचद्वैताद्वैतात्मकमेकंब्रह्म एमएम[illegible]

णत्वमुक्तास्थितिकालेपितदाहोद्रिक्तमिति प्रलयकालेपितयोःपूर्णत्वंदर्शयति पुनरिति कालभेदेन
कार्यकारणयोरुक्तांपूर्णतांनिगमयत्येवमिति कार्यकारणेद्वेपूर्णेचेत्तन्नहिकथमद्वैतसिद्धिरित्या
शंक्याह [illegible]चेति कथंनहिद्वयोरुक्तंपूर्णत्वंतत्राह कार्यकारणयोरिति एकपूर्णताव्यपदिश्यतेन द्वयो ए॰
रितिस्थितेलयामयमाहेवंचेति २

एकं ह्यात्मकमितिविप्रतिषेधमाशंक्य दृष्टांतेन निराचष्टे यथाकिलेति एवमेकं ब्रह्मानेकात्मकमिति शेषः

ब्रह्मणो द्वैताद्वैतात्मकत्वेपि सत्यमद्वैतमसत्यमितरदित्याशंक्याह यथावेत्यादिना द्वैतस्य परमार्थसत्यत्वे

मेकांडश्रुतिमनुकूलयति सर्वेति विपक्षे दोषमाह यदापुनरिति अस्मिन्काण्डप्रामाण्यमेतस्मान्न यदा द्वै

ति विरोधोप्यपनवियेरितिशेषः तमेवविरोधमाधयति वेदेति कथंतर्हि विरोधसमाधिरत आह यदेत्यादि

याकिलसमुद्रोजलतरंगफेनबुद्बुदाद्यात्मकएव यथावज्जलस्यसंततरंगफेनबुद्बुद

स्यःसमुद्रात्मभूताएवाविर्भावतिरोभावधर्मिणः परमार्थसत्याएव एवंसर्वमिदं द्वैतंपरमार्थसत्य

वाःजलतरंगादिस्थानीयाःसमुद्रजलस्थानीयंतुपरंब्रह्म एवंचकिलद्वैतस्यसत्यत्वेकर्मकाण्डस्य

प्रामाण्यं यदापुनर्द्वैतमविद्याविद्याकृतंमृगतृष्णिकावदसत्यमद्वैतमेवपरमार्थसत्यं तदाकिलकर्म

काण्डविषयाभावादप्रमाणंभवति तथाचविरोधएवस्याद्वैदिकदेशभूतोपनिषत्प्रमाणपरमार्थाद्वैत

वस्तुप्रतिपादकत्वादप्रमाणंकर्मकाण्डमसद्द्वैतविषयत्वात् नद्विरोधपरिजिहीर्षयाप्युक्तेत्युक्त

यंकारणयोःसत्यत्वंसमुद्रवत्पूर्णमदःइत्यादिनेति नेदसत् विशिष्टविषयापवादविकल्पयोरसंभवात्

क्वापिसविवक्षिताकल्पना कस्माद्यथाक्रियाविषयेउत्सर्गप्राप्तस्यैकदेशेऽपवादः क्रियते यथाहिंसे

त्सर्वभूतान्यन्यत्रतीर्थेभ्यइतिहिंसासर्वभूतविषयेउत्सर्गेणनिवारितातीर्थेविशिष्टविषयेऽभ्यनुज्ञा

मादावनुज्ञायते

तिप्राप्तेभवत्प्रपंचप्रस्थानंप्रस्तावयति नदसदिति विशिष्टमद्वितीयंब्रह्मतद्विषयोत्सर्गापवादयोर्विकल्पस्य

विषयोऽप्यसंभवत्तत्प्रतिज्ञाभागंविभजते नहीति तत्प्रश्नपूर्वकंहेतुंविवृणोति कस्मादित्यादिनायथा

त्यादिग्रंथस्यतत्त्वेत्यादिनासंबंधः क्रियायामुत्सर्गापवादसंभवनामुदाहरति यथेत्यादिना तथान्य

पिक्रियायामुत्सर्गापवादौदृष्टव्याविति शेषः

वैधर्म्यं दृष्टांतस्य दार्ष्टांतिकमाचष्टे यथेति विषयभेदे सत्युत्सर्गापवादौ देहादेरिनानाव दृष्टौ नायं ब्रह्मणः संभवत
हि ब्रह्माद्वितीयमेव जायते लीयते चेति संभावनास्पदमिति भावः उत्सर्गापवादानुपपत्तिवद्ब्रह्मणोऽनेकत्व
नुपपन्नेऽनेकरसमेवेति वाच्यमित्याह तथेति विकल्पानुपपत्तिमुपपादयति यथेत्यादिना संप्रति समुच्चय
संभवमभिदधाति विरोधाच्चेति उत्सर्गापवादविकल्पसमुच्चयानामसंभवान्नुपपत्तौ दृष्टांतानंतरं सत्त्व
कल्पनेति फलितमाह यस्मादिति परकीयकल्पनानुपपत्तौ हेत्वंतरमस्तीत्याह श्रुतिविरोधश्चेति कल्पनायामिति
धमकरयति यथेति ब्रह्मणोऽनेकरसत्वे स्यादिति शेषः नित्यत्वानुपपत्तेरात्मनो नित्यत्वांगीकारविरोधः स्यादि
त्यनयावस्थाविषयस्य हेतोर्न ब्रह्मोत्सर्गापत्तिपादयपुनस्तद्देकदेशोपवदिष्टस्य ब्रह्मणोऽद्वैतत्वादे
कदेशानुपपत्तेस्तथाविकल्पानुपपत्तेश्च यथाजिरान्वेषोऽहितं गृहेति नाजिरान्वेषो ऽहितं गृहस्येति निगृ
ह्णाग्रहणयोः पुरुषाधीनत्वाद्विकल्पो भवति नत्विह तथावस्तु विषयेऽद्वैतं वास्याद्द्वैतं वेति विकल्प
संभवस्य पुरुषतंत्रत्वाद्वस्तुनः विरोधाच्चद्वैताद्वैतत्वयोरेकस्य तस्मात्स्वविवक्षितैकत्वं नामुनि
मायविरोधाच्च सैंधवघनवदनंतानेकरसघनं निरंतरं पूर्वापरवाह्याभ्यंतरभेदविवर्जितं सवाह्याभ्यंतर
मजं नेति नेत्यस्थूलमनणु अजमजरममरममृतमभयमित्येवमाद्याः श्रुतयो निश्चितार्थाः संशयविपर्ययासंभव
रहिताः सर्वाः समुद्रेरिताः स्युरिति किं विकल्पेन तथान्यायविरोधोऽपि सावयवस्यानेकात्मकस्य
क्रियावतो नित्यत्वानुपपत्तेः नित्यत्वं चात्मनः स्मृत्यादिदर्शनादनुमीयते तद्विरोधश्च सावयवत्वे आत्मत्वेऽभ
वात्कल्पनानर्थक्यं च स्यात्कर्मेव चाभिमतस्य कर्मकांडानर्थक्यं अकृताभ्यागमकृतविप्रणाशप्रसंगात्
साध्याहारः ननु तस्य नित्यत्वं नांगीक्रियते मानाभावादित्याशंक्याह नित्यत्वं चेति स्मृत्यादिदर्शनादिसा
दृश्येन सर्वानुक्रमानुस्मृतिप्रत्यभिज्ञाधिकरणो काहं तदा गृहीतं अनुमीयते कल्पनेत्यक्रियत इत्याव
न हि विरोधश्च स्मृत्यादिदर्शनकृतात्मनित्यत्वानुमानविरोधश्चेत्यर्थः आत्मनो नित्यत्वे दोषांतरमाह भवति
ति कर्मकांडस्य सत्यार्थत्वं परेण कल्पनेन तदानर्थक्यमात्मानित्यत्वस्य दृष्टमेवापत्तेरिति क्रमेण स्फुटयति स्यात्

ब्रह्मणो नानारसत्वे विरोधमुक्तमसहमानः स्वोक्तं स्मारयति नन्विति समुद्रादीनां कार्यत्वसावयवत्वाभ्याम
नेकात्मकत्वमविरुद्धं ब्रह्मणस्तु नित्यत्वान्निरवयवत्वाच्च नानेकात्मत्वं युक्तमिति वैषम्यमादर्शयन्नुत्तरमा
ह नेत्यादिना ब्रह्मणो नानारसत्वकल्पनानुपपत्तिमुपसंहरति तस्मादिति अजो नित्यः शाश्वतोऽयं पुराण
इत्याद्या स्मृतिः ननु प्रत्यक्षादिविरोधेनोपनिषदां विषये सिद्धार्थे मेषा कल्पना क्रियते न तथा च कथं सानुपपन्ना
स्यादिति शङ्कामाह अस्याश्चेति विरुद्धार्थकल्पनेऽपि तत्प्रामाण्यानुपपत्तेरविशेषादिति भावः किं च ब्रह्मणो नाना

ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते कथमुच्यते न भवत्येवं सद्द्वैतत्वं विरुद्धमिति
तत्र विषयत्वान्नित्यनिरवयववस्तुविषयं हि विरुद्धत्वमवोचाम द्वैताद्वैतत्वस्य तत्कार्यविषय
सावयवे तस्माच्छ्रुतिस्मृतिन्यायविरोधादनुपपन्नेयं कल्पना अस्याः कल्पनाया वरमुपनिष
त्परित्याग एव अग्राह्यत्वाच्च नानारसत्वकल्पना नहि जननमरणाद्यनर्थशतसहस्रभ
रसमाकुलं समुद्रवनादिवत्सावयवमनेकरसं ब्रह्म ग्राह्यत्वेन विज्ञेयत्वेन वा श्रुत्योपदिश्यते
ज्ञानपरं चोपदिशति एकधैवानुद्रष्टव्यमिति वा नेकधादर्शनापवादाच्च मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यतीति एवञ्च त्वानित्यादिना तन्नेकनेयं पक्षे न क्रियातेन सशास्त्रार्थः ब्रह्मणोऽने
करसत्वमनेकधात्वं द्वैतरूपं नित्यत्वान्न दृष्टव्यमतो न शास्त्रार्थः ॥
रसत्वं लौकिकं वैदिकं वा नाद्यः तस्यालौकिकत्वात् तत्र नानारसत्वे लोकस्यातटस्थत्वान्नाद्वितीयः तन्नाना
रसत्वस्याध्येयत्वेनैयत्वेन वा शास्त्रेणानुपदेशादित्याह अध्येयत्वाच्चेति नदेव स्फुरयति नहीति तत्र
नानारसत्वं ब्रह्मणो नोभयथा शास्त्रप्रकाश्यमित्याह प्रज्ञानेति चकारादुपदिशतीत्यध्याहार्यं अनेकधा
दर्शनापवादाच्च नानारसं ब्रह्म शास्त्रार्थो न भवतीति शेषः भेददर्शनस्यानिन्दितत्वे लब्धमर्थमाह यदीति
अकर्तव्यतेप्राप्तमर्थयति ए ह्वनेति सामान्यप्रायं प्रकर्तव्योजयति ब्रह्मणः इति एकरसम् ।

बृ०भा० कस्तर्हि शास्त्रार्थं स्तत्राह कथमिति यद्येकरसे ब्रह्मणुक्तं दोषमनुभाषते यदुक्तमिति कर्मकाण्डस्याप्रा[illegible]

४०५ प्रामाण्यं प्रसक्तं द्वैतविषयत्वात् ब्रह्मकाण्डस्यानुक्ते द्वैतेऽप्रामाण्यं परमार्थाद्वैतवस्तुप्रतिपादकत्वात्तयोर्वि

विरोधोऽप्यपरिहार्य इत्यनुवादार्थः कर्मकाण्डाप्रामाण्यप्रसङ्गं दूषयति नेति प्रसिद्धभेदमादाय तत्रैव विधि

निषेधोपदेशस्य प्रवृत्तिसिद्धेः शास्त्रार्थं ज्ञात्वा कर्मकाण्डं न कश्चिदर्थः ननु शास्त्रमेव द्वैतमेवं बोधयित्वा

श्रेयोऽभ्युदयसाधनं कर्मोपदिशति तथा च नास्ति भेदस्य प्रामाण्याप्तिरित्यत आह नहीति यथा हि शास्त्रं जातमा

त्रं पुरुषं प्रसक्तं द्वैतं वस्तु ज्ञापयित्वा पश्चाद्ब्रह्मविद्यामुपदिशति तथा न यथा प्रथममेव पुरुषं प्रति द्वैतं बोधयि

त्वा कर्म पुनर्बोधयतीत्यपि नाभ्युपेयं प्रथममतो भेददर्शनावस्थायामस्य शास्त्रस्याधिकारित्वादित्यर्थः द्वैतस्या

एकरसत्वं ब्रह्मणस्तद्बुद्ध्या त्वात्मा शास्त्रं प्रशस्तत्वाच्छास्त्रार्थो भवितुमर्हतीति यदुक्तं वेदैकदेश

स्याप्रामाण्यं कर्मविषये द्वैताभावाद्द्वैतेऽप्रामाण्यमिति तन्न यथाप्राप्तोपदेशकत्वात् नहि

न मद्वैतं वा वस्तु ज्ञानमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्म वा दिशति [illegible]

शेषत्वेनाह द्वैतं जानमात्रप्राणि बुद्धिगम्यत्वात् न च द्वैतस्यान्तर्गतबुद्धिः प्रथमं ने वक्तव्य इति

न येन द्वैतस्य सत्यत्वमुपदिश्य पश्चात्तेन प्रामाण्यं प्रतिपादयेच्छास्त्रं नापि [illegible]

पिता शास्त्रस्य प्रामाण्यं गृह्णाति

परदेशाद्द्वैतमङ्गीकृत्य सोऽकृत देवतानामित्याह नवेति न तद्द्वैतस्य सत्यत्वबुद्ध्यभावे कर्मकाण्डानुष्ठानाय [illegible]

नुपपत्तेः स्वप्रामाण्यसिद्ध्यर्थमेव द्वैतस्य सत्यत्वं श्रुतिर्बोधयिष्यतीत्याह न च द्वैतस्येति [illegible]

षु कर्म जडानां प्रवृत्तिप्रतीतेः प्रथमतो द्वैतानृतत्वबुद्धिर्न द्वैत [illegible] सस्यत्व [illegible]

पि द्वैतस्य सत्याभिनिवेशादित्यर्थः किञ्च न द्वैतवेत्तृत्वं शास्त्रप्रामाण्यविघातकं [illegible]

स्यापि तानि स्वविषय [illegible] तमिथ्यात्वावगमेऽपि लिङ्गकामस्य [illegible]

[illegible] शास्त्रस्यापि प्रामाण्यं भविष्यति साधनत्वशक्त्यनपहार [illegible]

प
हेतादिप
...रीतम

काण्डद्वयस्य प्रामाण्यौपयिकमुपसंहरति [illegible]मादित्यादिना प्रसिद्धो योऽयं क्रियादिरूपो हेतुदोषः सातिशयत्वादिः
दृष्टान्तविवेकस्तद्धेतोस्तस्मात् हेतुमोदासीन्योपलक्षितस्वरूपेण सिद्धवस्थानं केवल्यं तद्धेतुमुमुक्षोस्साधनच
तुष्टयसंपन्नायेत्यर्थः किं च तत्त्वज्ञानादूर्ध्वं पूर्वकाण्डयोर्विरोधशंकायां नाद्यः स्याद्वाहार्थेति अवस्था भेदात्
स्मिन्नपि पुरुषे काण्डद्वयस्य प्रामाण्यमविरुद्धमित्येवं स्थितेस्तस्मुपनिषद्भिस्तत्त्वज्ञानोत्पत्त्यनन्तरं नान्तरीयकत्व
नग्रामैकैवल्यं पुरुषस्य नैराकांक्ष्यं जायते न च नैराकांक्ष्यं पुरुषं प्रति शास्त्रस्य प्रामाण्यं स्वमहिम प्रतिष्ठितं निर्वा निद भि

[illegible]माद्यथा प्रामाण्यमेव हेतुमविद्याकृतं स्वाभाविकमुपाधाय स्वाभाविकोऽविद्योपायुक्तो यागद्वेषादि
दोषवत्ते यथाभिमतपुरुषार्थसाधनं कर्मोपदिशत्यग्रे पश्चात्प्रसिद्धक्रियाकारकफलस्वरूपत्वेषु तत्त्व
वत्ते न हि परिनौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूतामात्मैकत्वदर्शनाख्यां ब्रह्म [illegible]विद्या
मुपदिशति [illegible]एवं सति न दोषः औदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रत्यक्षादित्वेनिवर्तत
तद्भावाच्छास्त्रस्याविशास्त्रत्वं न प्रतिनिवर्तत एव यथा प्रतिपुरुषं परिसमाप्तशास्त्रमिति न शास्त्र
विरोधगंधोऽप्यस्ति [illegible]द्वैतज्ञानावसानत्वाच्छास्त्रशिष्यशासनादिद्वैतभेदस्य

वानिसोनक्तत्त्वेन कापुंसां येनोपदिश्येनेत्याचष्टे अभिधीयत इति या यानुक्तन्तस्य प्रतिप्रसक्तं च नादिविर
हिणः शास्त्रत्वायोगात्तत्त्वज्ञानादूर्ध्वं धर्माभावाद्विरोधासिद्धिरित्यर्थः एकस्मिन्पुरुषे दर्शितमार्थस्य [illegible]
दर्शिति [illegible]यति ज्ञानादूर्ध्वं विरोधाभावमुपसंहरति इत्यनेनेति कल्पान्तरं प्रसाहहेतुं तेन तत्त्वज्ञानात्पूर्वं भेद
वस्थितत्त्वानां भाविद्याभादापाधिकारिभेदादवस्था भेदाद्वाकाण्डयोरविरोधसिद्धिरित्यर्थः [illegible] एवमप्रामा

वृ॰भा उक्तमेवोपपादयत्यन्यतमेति शिवादीनामन्यतमस्यैवावस्थानं चेद्व्यवस्थितस्येतरस्मिंश्चासावेक्षत्वान्नत्सोऽयव तेऽ॰
४०६ तिवृत्तेनव्रह्मानामागन्यतमस्यैवावस्थानं सर्वेषामेवतेषां यथाप्रतिभासमवस्थानादतो न पूर्वविरोधशंके
सर्थः कथं [illegible]
केवलं धुंविरोधशंकाभावमधिकविवक्षयानुवदति सर्वेति कथं केवलं विरोधाभावस्यासत्वादित्यतः शंव
ह यदीति अद्वैतत्वादेवाभावस्यापि तत्वनिमज्जनादित्याशङ्कनएवेति अद्वितीयमेव ब्रह्मन द्वैतात्मकमिति
पपादितमिदानीं ब्रह्मणो द्वैताद्वैतात्मकत्वाभ्युपगमेऽपि विरोधी न शंकानेपरिहर्तुमित्याह अद्यापीति तुल्य

अन्यतमावस्थाने हि विरोधः स्यादवस्थितस्येतरेतरएपेक्षितत्वान् शास्त्रस्य शिष्यशासनानानात्म न
मोक्षः व्यवतिष्ठते सर्वे समाप्तो नुकस्य विरोध आशंक्यतेनाद्वैतेके वलेशिवे सिद्धे नाप्यविरोधनाग जएर
अथाप्यभ्युपगम्यत्र्यमः द्वैताद्वैतात्मकत्वेपिशास्त्रविरोधस्य तुल्यत्वात् यद्यपि समुद्रादिवत् द्वैताद्वैता
त्मकत्वं ब्रह्माभ्युपगच्छामः नान्यद्वस्तु न रंतदापि भवदुक्ताच्छास्त्रविरोधान्नमुच्या महे कथमेवाद्वै
परब्रह्मद्वैताद्वैतात्मकं न च्छोकमोहाद्यतीतत्वादुपदेशनाकांक्षति नचोपदेशान्यो ब्रह्मणोऽद्वैताद्वैत
रूपस्य ब्रह्मणएकस्यैवाभ्युपगमात्

त्वामद्भ्युपगमो वृथेति शेषः उक्तमेवोपपादयति यद्यपीति द्वैताद्वैतात्मकं ब्रह्मेति पक्षे कथं विरोधान्न समा
धीयते द्वैतमद्वैतं चाधिकृत्यकांडद्वयप्रामाण्यसंभवादित्याक्षिपति कथमिति किं ब्रह्मविषयस्त्वशास्त्रोप
देशः किंवा ब्रह्मविषयः प्रथमे द्वैताद्वैतरूपस्यैकस्यैव ब्रह्मणोऽभ्युपगमात्तस्य तु नित्यमुक्तत्वान्नोपदेशः संभ
भवतीत्याह एकेहीति तस्योपदेशाभावे हेत्वंतरमाह नचेति उपदेशाहि ब्रह्मणो नो न चाचानात्योऽभ्यु
पगमविरोधान्न हि तीर्थभेदमंतरेणोपदेष्टोपदेशकभावः संभवादितिभावः

कर्मान्तरमुखापवर्गयोरिति प्रतिज्ञाविरोधेन निराकरोति नदेति किंच सर्वस्य ब्रह्मरूपत्वेपः समुद्रदृष्टान्तः स तस्या
स्तोपदेशस्याब्रह्मविषयत्वादित्याह अस्मिन्निति अथ यथा फेनादिविकाराणां भिन्नत्वेपि समुद्रोदकात्मत्वं तथा
जीवादीनां भिन्नत्वेपि ब्रह्मस्वभावविज्ञाने स्यादुक्तं सर्वं मिति न विरुध्यत इत्याह नचेति सर्वस्य ब्रह्मत्वभंगः क
नत्वेन ब्रह्मविषय एवोपदेशः स्यादिदस्याविचारितरमणीयत्वादित्यर्थः ननु नानारूपवस्तुसमुदायो ब्रह्म तत्र
देशभेदादुपदेश्योपदेशकभावो ब्रह्मणानोपदिष्टमुपदेशकं चेतिनत्वाह नहीति नत्वहेतुमाह समुद्रेति

अथ द्वैतविषयस्यानेकत्वादन्योन्योपदेशो न ब्रह्मविषय उपदेश इति चेत् न द्वैताद्वैतात्मकमेकमेव ब्र
ह्मनान्यदस्तीति विरुध्यते अस्मिन् द्वैतविषये योन्योपदेशः सोन्योद्वैतं चान्यदेवेति समुद्रदृष्टान्तः विरुद्ध
वत्समुद्रोदकैकत्ववद्द्विशानेकत्वे ब्रह्मणो मत्वोपदेश्यग्रहणादिकल्पना संभवति नहि हस्तादिद्वैता
द्वैतात्मके देवदत्ते वाक्पाण्यादिवद्देवदत्तैकदेशभूतयोर्वागुपदेष्ट्रीकर्णः केवल उपदेशस्य ग्रहीता देवद
त्तस्तु नोपदेशानाप्युपदेशस्य ग्रहीतेति कल्पयितुं शक्यते समुद्रेको दकात्मवत्तदेकविज्ञानवता
द्देवदत्तस्य तस्मात्तु तिन्यायविरोधश्चाभिप्रेतार्थासिद्धिश्चैवं कल्पनायां स्यातां तस्माद्यथाव्याख्या
एवास्माभिः पूर्णोमदद्वयस्य सूत्रस्यार्थः

यासमुद्रस्योदकात्मना फेनादिभेदैकात्वं तथा देवदत्तस्यैव तस्य वागाद्युपदेष्टैकात्वेन द्विज्ञानवत्वा
दव्याप्तं भवति तथा ब्राह्मणपि द्रष्टव्यमित्यर्थः मतान्तरनिराकरणमुपसंहरति तस्मादिति आत्मैकत्व
प्रतिपादिका श्रुतिः न्यायश्च स्वावयवस्यानेकात्मकस्योपादानात्क्रमः अभिप्रेतार्था सिद्धिं भवत्कल्प
नानर्थकं चेत्यादिना दर्शिता एवं कल्पनायामेकानेकात्मकं ब्रह्मेत्युपगन्तारित्यर्थः परकीयव
ख्यानासंभवे फलितमाह तस्मादिति

बृ.भा. ध्यानशेषत्वेनोपनिषदर्थं ब्रह्मानुध्यानद्वितीयानार्थे तस्मिन्विनियुक्तं मंत्रमुदाहरत्योरवमिति इत्येतस्य दिवस टी.३
७६१ स्यकर्मान्तरे विनियुक्तत्वमाशंक्याह अवेति विनियोजकाभावादिति भावः नहि ध्यानेपि नायं विनियुक्तो
विनियोजकाभावाविशेषादित्याशंक्याह नेति पुराणमित्यादिब्राह्मणं तस्य विनियोजकं ध्यान
समवेतार्थप्रकाशनसामर्थ्यात् यद्यपि मंत्रे लिङ्गं सामर्थ्यं विनियोजकं तथापि मंत्रब्राह्मणयोरेकार्थत्वा
त् ब्राह्मणस्य सामर्थ्यद्वारा विनियोजकत्वमविरुद्धमिति भावः अत्रेति मंत्रोक्तिः विशेषणविशेष्यत्वेप
योः सामानाधिकरण्यं हेतुः कोनि विशेषणेति ब्रह्मस्वकं तस्याकांक्षाभावात् विशेषणेन स्याद्य्या

ॐ खं ब्रह्मेति मंत्रोयं वाक्यत्रा विनियुक्तः इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते अत्र ब्रह्मेति वि
शेष्याभिधानं खमिति विशेषणं विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलव
त् खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदो ऽविशेषितो यो विशेष्यते खं ब्रह्मेति यत्तत्खं ब्रह्म तत् ॐ

ॐ खं ब्रह्म

मिति शब्दवाच्यं ॐ शब्दस्वरूपमेव वा उभयथापि सामानाधिकरण्यमविरुद्धं इह च ब्रह्मोपास
नसाधनत्वार्थमोमिति शब्दः प्रयुक्तः तथा च श्रुत्यन्तरादेतदालम्बनं श्रेष्ठमेतदालम्बनं परमोमित्यात्मानं
युञ्जीत ॐ मित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत ॐ मित्येवं ध्यायथ आत्मानमित्यादेः अन्यार्थासं
भवाच्चोपदेशस्य ॥ १ ॥ इह ब्रह्मशब्द इति निरुपाधिकस्य सोपाधिकस्य वा ब्रह्मणो विशेषणत्वेपि वक्तु
न स्मिन्नोंशब्दप्रवृत्तिरित्याशंक्याह यद्यदिति किमितिपद्योक्ते ब्रह्मणोंशब्दो मंत्रे प्रयुज्यते तत्राह इह चेति
ओंशब्दो ब्रह्मोपासने साधनमित्यत्र मानमाह तथा चेति सापेक्षं श्रुत्यंतरं यत्तत्परमिति आदिशब्देन
प्रणवो धनुरित्यादिगृह्यते ॐ ब्रह्मेति सामानाधिकरण्योपदेशस्य ब्रह्मोपासनसाधनत्वमोंकारस्येन ए
स्मादर्थान्तरसंभवात्तस्येनत्साधनत्वमेष्टव्यमित्याह अन्यार्थेति

एतदेव प्रपंचयति ॥ अथेत्यादिना अन्यत्रेति नेति रीयक्ष निग्रहणं अपवर्गः तस्यावसानमर्थांतरं वर्गान्तरभावेफ
लितमाह ॥ भूतादिति ननु शब्दान्तरे स्थिपि ब्रह्म वाचकेषु सत्सु किमित्योंशब्द एव ध्यानसाधनत्वेनोपदिश्यते
नाम ॥ ॥पीति नेदिष्ठं निकटतमं प्रियतमं मित्यर्थः प्रियतमत्वप्रयुक्तं फलमाह तत एवेति साधनत्वविशेषवि
शेषं दर्शयति ॥ ॥तेति प्रतीकत्वेन कथं साधनत्वमिति पृच्छति प्रतीकत्वेनेति कथमित्यथाह ॥ रः नरिहरति

॥ ॥ प्रतीभिति शंसत्युद्धा पतीत्येवमादीत्यादध्यायांते भाष्यगतयोकारप्रयोगविनियोगादेवगम्यते न
चेतरथा ध्यानमिहावगम्यते तस्मात् ध्यानसाधनत्वेनैवोंकारशब्दस्योपदेशः यद्यपि ब्रह्म नामादिशब्दाः
ब्रह्मणो वाचकास्तथापि ॐ ॥ तिप्राशेण्याद्ब्रह्मणो नेदिष्ठमभिधानमोंकार एव ब्रह्मप्रतिपत्ताविर
परं साधनं ॥ द्विःप्रकारेणप्रतीकत्वेनाभिधानत्वेन च प्रतीकत्वेन यथाविष्णु   दिप्रतिमाभेदेनैव
मोंकारो ब्रह्मेति प्रतिपत्तव्यः तथाह्योंकार   सर्वपुराणं   लंबनमेव हि प्रतीदति एतदालंबनं श्रेष्ठ
मेतदालंबनं परं एतदालंबनं ज्ञात्वा ब्रह्म   लोके महीयते इति ॥ नत एव मितिभो
तिकत्वेमतीतिमोभूदित्याह सर्वपुराणां विरंतनं सर्वं परमात्माकाशमित्यर्थः यन्नतरमात्मा काशं पुरा
णं सर्वतद्वक्ष्यद्धि विषयत्वादिवालंबनमशक्यं गृहीतुमिति तत्त्रामे   भावविशेषेणोंकार
वेशं स्थति ॥ ॥ वि ॥ ॥ ॥ कं गा   तितायां शिलादि प्रतिमायां दृष्टा लोकरवं रामरामरामरामेर राम

ओमि ॐ कारो ब्रह्मेति प्रतिपत्तोर्किं स्यात् एतह तथाहोति मंत्रमेवं आम्नाय ब्राह्मणमवतारयत्यावदे
द्दिनामंत्रसमर्थः ननु यत्तोकं तत्तत्वेनैरूपेण प्रतिपत्तुं शक्यमितिं प्रतीकोपदानेत्याशंक्याह इतदितिमा वा
बोधुद्देवि विषयारवशपरिहृत्य प्रथमगृब्रह्म त्वनाभिमुख्यं ओंकारे ब्रह्मादर्शनमुदाहरणेनदर्शयति ॥ अति

कल्पान्तरमाह [illegible]पुरमित्यादिना किमिति सूत्राधिकरणमव्याकृतमाकाशमात्रं [illegible]
नत्वेवम्भूताकाशात्मनाविपरिणतमितिभावः नहिंपसद्रूपे संकल्पवदानेकः सिद्धान्तः स्यादिति शंक्यादि [illegible]
रिभेदमाश्रित्याह [illegible] नरस्यान्यथासिद्धिसंभवादोंकारस्य प्रतीकत्वोपदिवदतीत्यतिम [illegible]

वायुरं खं वायुरस्मिन्विद्यमानं इति वायुरं खं खमात्रं खमित्युच्यते न पुराणं खमित्येवमाह स्मकौरव्यो कौर
व्यायणीपुत्रो वायुरेहि खे मुख्यः खशब्दस्य वहारस्तस्मान्मुख्यं सप्रत्ययोयुक्त इति मन्यते तत्र पुरा
णं खं ब्रह्म निरुपाधिस्वरूपं यद्वा वायुरं खं सोपाधिकं ब्रह्म सर्वथाप्योंकारप्रतीकत्वेनैव प्रतिभाव
साधनत्वं प्रतिपद्यते एतद्धि सत्यकाम परं चापरं च ब्रह्म यदोंकार इति श्रुत्यन्तरात्केवलं खं ग्राह्यं

वायुरं खमिति हस्माह कौरव्यायणीपुत्रो वेदोयं ब्राह्मणा विदुः

वेदविप्रतिपत्तिः वेदोयमोंकारो वेदविजानात्यनेनयद्वेदितव्यं तस्माद्वेद ॐकारो वाचकोभिधानं
तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाश्यमानमभिधीयमानं वेदसाधको विजानात्युपलभ्यते [illegible]
स्माद्वेदोयमिति ब्राह्मणा विदुस्तस्माद्ब्राह्मणानामभिधानत्वेन साधनत्वमभिप्रेतमोंकारस्य। [illegible]

[illegible]तमिति इतरत्र विप्रतिपत्तिर्द्योतकाभावादिति भावः प्रतीकपक्षमुपपाद्याभिधानपक्षमु[illegible] पपादय
ति [illegible]पमितितदेव प्रपंचयति [illegible]नेति [illegible] वेदस्यत्रादेगह [illegible] ब्राह्मणा विदुरिति विशेषनिर्देश [illegible]
तात्पर्यमाह तस्मादिति ॥

प्रतीकपक्षेपिवेदोयमित्यादिग्रंथोनिर्वहतीत्याह अथवेति विध्यभावेकथमर्थवादःसंभवतीत्याशंक्यपरिहर ति [illegible]मित्यादिनावेदत्वेनस्तुतिमोंकारस्यसंग्रहेविवरणाभ्यांदर्शयति सर्वोहीति ओंकारेसर्वस्यनामजातस्यां तर्भावेप्रमाणमाह [illegible]येति तत्रैवहेत्वंतरमवतार्यव्याकरोति इतश्चेति वेदितव्यंपरमपरंचब्रह्म द्वेब्रह्मणी

[illegible]वावेदोयमित्याद्यर्थवादःकथमोंकारोब्रह्मणःप्रतीकत्वेनविहितःॐखंब्रह्मेतिसामानाधिकर ण्यात्स्तुतिरित्याशंक्यवेदत्वेनसर्वोह्ययंवेदॐकारएवएतत्प्रभवएतदात्मकःसर्वःऋग्यजुःसामादि भेदभिन्नएषॐकारः[illegible]यथाशंकुनासर्वाणिपर्णानीत्यादिश्रुतेस्तस्मात् इतश्चायंवेदॐकारोयदने

वेदैनेनयद्वेदितव्यं १॥ प्रथमंब्राह्मणं

दितव्यंतत्सर्वमोंकारेणोववेदनेनातोयमोंकारोवेदःइतरस्यापिवेदस्यवेदत्वमतएव तस्माद्विशिष्टोय मोंकारःसाधनत्वेनप्रतिपत्तव्यइति अथवावेदःसःकोसौयंब्राह्मणाविदुरोंकारंब्राह्मणानांह्यसौप्र णवोद्गीथादिकल्पैर्विनियोगःतस्मिन्प्रयुज्यमानेसाधनत्वेनसर्वोवेदःप्रयुक्तोभवतीति १ इतिपंचम स्यप्रथमंब्राह्मणं

वेदितव्योस्तीतिश्रुत्यंतरात् तद्वेदनसाधनत्वेपिकथमोंकारस्यवेदत्वमित्याशंक्याहेतरस्यापीति अतएव वेदितव्यवेदनहेतुत्वादेवेत्यर्थःप्रतीकपक्षेवाक्ययोजनांनिगमयति तस्मादिति अभिधानपक्षेप्रतीक पक्षेचैकंचवाक्यमेकेकत्रयोजयित्वापक्षद्वयेपिसाधारण्येनयोजयत्यथवेति तस्यपूर्वोक्तनीत्यावेदत्वे [illegible]लाभंदर्शयति तस्मिन्निति ॐकारस्यब्रह्मणोपासिसाधनत्वमित्थंप्रसिद्धमित्युपसंहर्तुमितिशब्दः

बृभा° ब्राह्मणान्तरस्य तात्पर्यमाह [illegible]नेति तद्धि यानं सर्वोपास्तिशेषत्वेनेति द्रष्टव्यमाउपासिकाप्रकरणारंभः पितरि
५०८ ब्रह्मचर्यमूषुरिति संबंधः प्रजापतिसमीपे ब्रह्मचर्यं तावन्मात्रेण किमित्यसौ देवादिभ्यो हितं रूपादिस्यादित्याह ५

[illegible]नादमादिशाधनत्रयविधानार्थोयमारंभः त्रयाः त्रिसंख्याकाः प्रजापतेरपत्यानि प्राजापत्यास्ते किं
प्रजापतौ पितरि ब्रह्मचर्यं [illegible]तस्ते ब्रह्मचर्यस्य प्राधान्याच्छिष्याः संतो ब्रह्मचर्यमूषुरिति वक्तव्यस्यार्थः
के ते विशेषतो देवा मनुष्या असुराश्च ते चोषित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते तेषां देवा ऊचुः पित
रं प्रजापतिं किमिति ब्रवीतु कथयतु नो ऽस्मभ्यं यदनुशासनं भवानिति तेभ्य एवमर्थिभ्यो हएतदक्षरं द

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्र
वीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति
न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥१॥

एतन्मात्रमुवाच द इति उक्त्वा च तान् पप्रच्छ पिता किं व्यज्ञासिष्टा३ इति मयोपदेशार्थमभिहितस्याक्ष
रस्यार्थं विज्ञातवंत आहोस्विन्नेति देवा ऊचुर्व्यज्ञासिष्मेति विज्ञातवंतो वयं यद्यद्वक्तव्यमुच्यमानं किं मयोक्त
मिति देवा ऊचुर्दाम्यत अदांता यूयं स्वभावतः अतो दांता भवतेति नो ऽस्मानात्थ कथयसि इतर आहोमि
ति सम्यक् व्यज्ञासिष्टेति समानमन्यत् १३
[illegible]योति शिष्यभावेन तत्संबंधिनो यथा [illegible] तेषामथ ब्रह्मचर्यस्य [illegible] ऽयं तेषामिति निर्द्धारणे षष्ठी
हापोहशक्तानामेव शिष्यत्वमिति द्योतनार्थो हशब्दः विचारार्थाप्लुतिरित्येके [illegible]
ओमित्यनुज्ञामेव विभजते सम्यगिति

समानत्वेनोत्तरस्य सर्वस्यैवार्थवादस्याम्नाये पाठे प्राप्ते तत्रैतात्पर्यमाह स्वभावतः निदानमेव लोभस्याग
रूपमुपदिश्यमिति कुतो निर्दिष्टं किमस्मदेवहितं किंचिदादिष्टं किं तस्मादित्योर्णकाह किमन्यदिति यथादे
वामनुष्याणां स्वाभिप्रायानुसारेण दकारश्रवणोत्तसमर्थं जगृहुस्तथेति यावत् एष धर्मस्तत्तात्पर्यमः

[illegible]ावतो लुब्धाप्रूपमतो यथा शक्त्यासंविभजत दत्तेति नोऽस्माना[illegible]त्थ किमन्यद्ब्रूयान्नो हितमिति मनु
ष्याः तथा असुराद्यधमिति क्रूरापूर्वहिंसादिपराः अतो दयध्वं प्राणिषु दयां कुरुतेति दितेर्न[illegible]सुरजा

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति
व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति २ अथ हैनमसुरा ऊचुर्ब्रवी
तु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्व मि
ति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति

पतेरनुशासनमद्याप्यनुवर्तत एव कः पूर्वं प्रजापतिर्देवादीननुशशास सोऽद्याप्यनुशास्ति देवदैव्या स्तनयित्नु
लक्षणया वाचा कथमेषा श्रूयते दैवी वाक् कासौ स्तनयित्नुः द द द इति दाम्यत दयध्वमित्येषा वाचा[illegible]नु
नामुपलक्षणाय त्रिर्दकार उच्चार्यते २

रयति [illegible] इति हिंसादीसादिशब्देन परस्वापहारादिगृह्यते प्रजापतेरनुशासनं प्रागासीदित्यत्र लिंगमाह
[illegible]नदति अनुशासनस्यानुवृत्तिमेव व्याकरोति या पूर्वमिति द द द इति त्रिःसंधिकरणं सर्ववर्णान्तरश्रमाणे[illegible]

बृ॰भा यथादकारत्रयमत्र विवक्षितं न तथात्रतनयपि तु शब्दे त्रित्वं विवक्षितं चेत्प्रसिद्धिविरोधः स्यादित्याशंक्याह तस्मादि
५१० तीति दशब्दानुकारमात्रमत्र विवक्षितं न तु तन्नयपि तु शब्दे त्रित्वं प्रमाणाभावादित्यर्थः प्रकृतस्योपदेशस्य
विधिपर्यवसायित्वं फलितमाह तस्मादिति उपादानप्रकारमेवाभिनयति प्रजापतेरिति श्रुतिसिद्धविध्यनुसा
रेणभगवद्वाक्यप्रवृत्तिं दर्शयति तथा चेति तदेतत्त्रयं शिक्षेदित्येषविधिश्चेत्कृतं त्रयाः प्राजापत्यादिर्ग्रंथेनेत्या
शंक्य यस्मादित्यादिना सूचितमाह सोयमिति सर्वैरेवत्रयमनुष्ठेयं चेत्तर्हि देवादीनुद्दिश्य दकारत्रयोच्चारणमनु

अनुक्तमिति तेन तु त्रितयपि तु शब्दः स्मारेवसंख्यानियमस्य लोके प्रसिद्धत्वात् यस्माद्द्यापि प्रजापतिर्दं
यत्तदत्तदयमित्यनुशास्त्येव तत्तस्मात्कारणादेतत्त्रयं किं तत्त्रयमित्युच्यते दमं दानं दयामिति शिक्षेदुपा
ददीत प्रजापतेरनुशासनं अस्माभिः कर्तव्यमित्येवं मतिं कुर्यात् तथा च स्मृतिः त्रिविधं नरकस्येदं द्वारं

नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदिति अस्यापि विधेः शेषः पूर्वस्तथापि दे
वादीनुद्दिश्य किमर्थं दकारत्रयमुच्चारितवान् प्रजापतिः पृथगनुशासनार्थिभ्यः तेषां वा कथं विवेकेन प्र
तिपन्नाः प्रजापतेर्मनोगतं समानेनैव दकारवर्णमात्रेणेति पराभिप्रायज्ञाः विकल्पयन्तीति ॥ राम राम राम

पपन्नमिति शंकते तत्रैवेति दमादित्रयस्य सर्वैरनुष्ठेयत्वे सतीति यावत् किं च पृथक्पृथगनुशासनार्थिनां दे
वादयस्तेभ्यो दकारमात्रोच्चारणे नापेक्षितमनुशासनं सिध्यतीत्याह पृथगिति किमर्थमित्यादिना पूर्वेण
संबंधः दकारमात्रमुच्चारयतोपि प्रजापतेर्विभागेनानुशासनमभिसंहितमित्याशंक्याह तेवेति त्रयं सर्वैरनु
मिप्रायस्य द| ष्ठेयमिति परस्य सिद्धांतिनोभिप्रायः संतोषयोक्तनीत्या विकल्पयंतीति योजना पराभिप्रायज्ञा इत्युपहासो रा
वा परस्य प्रजापतेर्मनुष्यादीनां चाभिप्रायज्ञा इति ननु ह्लो खो वा या राम राम राम राम राम राम राम राम

एकीयंपरिहारमुत्थापयन्नेति आह तेषामेषाशंकातथापिदकारमात्रात्कीदृशीप्रतिपत्तिरित्याशंक्याह तेषां चेतिनदत्तोदकारात्दमादित्तस्यप्रतिपत्तिलक्षतद्वारेणादांतत्वादिनिवृत्तिराहोदित्यर्थः किमितिप्रजापतिरेवं चक्षापनद्वारेणाननोदेवादीननुशासनादोषान्निवर्तेयिष्यतितत्राह लोकेपीति दकारोच्चारणस्यप्रयोजनेसिद्धेफ

अन्येकेआहुः अदांतत्वादानत्वादयालुत्वैरपराधितमात्मनोमन्यमानाः शंकिताएवप्रजापतावूचुः किं नोवक्ष्यतीति तेषांचदकारश्रवणमात्रादेवात्मशंकावशेनतदर्थप्रतिपत्तिरभूत् लोकेपिहिप्रसिद्धंपुत्राः शिष्याश्चानुशास्याः संतोदोषान्निवर्तयितव्याइति अतोयुक्तंप्रजापतेर्दकारमात्रोच्चारणंदमादित्रयंचद कारान्वयात्मनोदोषानुरूप्येणदेवादीनामविवेकेनप्रतिपन्नंचेति फलंत्वेतदात्मदोषज्ञानेसतिदोषा न्निवर्तयितुंशक्यतेल्पेनाप्युपदेशेन। यथादेवादयोदकारमात्रेणेति

लितमाहितरति यदुक्तंतेवाकथमित्याशंक्याह दमादीति प्रतिपन्नंचयुक्तंदमादीतिशेषः इतिशब्दः स्वय थ्यमतसमाप्त्यर्थः परोक्तंपरिहारमंगीकृत्याख्यायिकातात्पर्यंसिद्धांती ब्रूतेफलंत्विति निमित्तेनदोषाद्देवाद योयथादकारमात्रेणानतोनिवर्तंत इतिशेषः इतिशब्दोदृष्टांतिकप्रदर्शनार्थः रामरामरामरामराम

विशिष्टान् प्रत्यनुशासनस्य प्रवृत्तत्वादस्माकं तदभावादनुपादेयं दमादीति एवं तेनेत्युक्ते किं तद्देवादिभि रपि प्रातिस्विकानुशासनवशादेकैकमेव दमाद्यनुष्ठेयं तत्रयमित्याह देवादिभिरिति यथापूर्वस्मिन्काले देवादिभिरेकैकमेवोपादेयमित्युक्तं तथा वर्तमानेऽपि काले मनुष्यैरेकैकमेव तत्तत्प्रवृत्त्यानुसारेण तत्त्रयं शिक्षितव्यं तथा चकस्यायं विधिरित्याह आद्यत्वेऽपीति आचारप्रामाण्यमाश्रित्य परिहरत्यत्रेति एवैकैकमेव नोपादेयमिति शेषः दयालुत्वस्यानुष्ठेयत्वमाक्षिपति नन्विति मध्येदमादेर्नामितिपावत् असुरैरनुष्ठितत्वे

नैतत्त्रयाणां देवादीनामनुशासनं देवादिभिरप्येकैकमेवोपादेयं अद्यत्वेऽपि तत्त्रयं मनुष्यैः शिक्षितव्यमिति उच्यते पूर्वं देवादिभिर्विशिष्टैरनुष्ठितमेतत्त्रयं तस्मान्मनुष्यैरेव च शिक्षितव्यमिति दयालुत्वस्याननुष्ठेयत्वं तस्मात् कथमसुरैरमशक्तैरनुष्ठितत्वादिति चेत् न तु त्रयाणां अतोऽन्योन्याभिप्रायः प्रजापतेः पुत्रा देवादयः पुत्रेभ्यश्च हितमेव पित्रोपदेष्टव्यं प्रजापतिश्चाहितं तु नान्यथोपदिशतीति तस्मात्पुत्रानुशासनं प्रजापतेः परममेतद्धितं मतो मनुष्यैरेवैतत्त्रयं शिक्षितव्यमिति

पि दयालुत्वमनुष्ठेयं हितसाधनत्वाद्दानादिवदिति परिहरति नेत्यादिना देवादिषु प्रजापतेरविशेषात्तेभ्य उपदिष्टमद्यत्वेऽपि सर्वैर्मनुष्यैरभिसंधेयं हितत्वेऽपि चोपदेष्टव्यत्वे फलितेऽपि नरत्वात्मानात् प्रजापतिरन्यथोपदिशतीत्याशंक्याह प्रजापतिश्चेति हितं तत्त्रयं पितुरहितोपदेशित्वाभावस्तस्मादित्युक्तं विशिष्टैरनुष्ठितस्यास्य दयादिभिरनुष्ठेयत्वे फलितमाह मत इति प्राजापत्याद्देवादयो विग्रहवन्तः सन्तीत्यर्थवादस्य यथाश्रुतेऽर्थे प्रामाण्यमभ्युपगम्य दकारत्रयस्य तात्पर्यं सिद्धमिति वक्तुमितिशब्दः रामराम रामराम रामराम

प्रतिक्रमेमीमांसकमतमनुसृत्याह [illegible]वेति कथं मनुष्येष्वेव देवाक्षरत्वं तत्राह मनुष्याणामिति अन्येगुणा
न्नात्वयः किंपुनर्मनुष्येषु देवादिशब्दप्रवृत्तौ निमित्तं तदाह सत्वादीति देवादिशब्दप्रवृत्तौ निमित्तं तत्प्रा
[illegible]ंश्चेति मनुष्येषु देवादिशब्दप्रवृत्तौ फलितमाह तस्मादिति इतिशब्दो विद्युदपमितिप्रदर्शनार्थः मनुष्ये

[illegible]वा न देवा असुरा वा अन्ये केचन विद्यन्ते मनुष्येभ्यः मनुष्याणामेवाऽदान्तादयो ये रजमे गुणैः संप
न्नास्ते देवाः लोभप्रधाना मनुष्याः तथा हिंसापराः क्रूरा असुरास्त एव मनुष्या अदान्तत्वादिदोषत्रय
मपेक्ष्य देवादिशब्दभाजो भवन्ति [illegible]तांश्च गुणान्सत्वरजस्तमांस्यपेक्ष्य अतो मनुष्यैरेव शिक्षितम
मेतत्त्रयमिति [illegible]पेक्ष्यैव प्रजापतिनोपदिष्टत्वात् तथा हि मनुष्या अदान्ता लुब्धाः क्रूराश्च दृश्य
न्ते यथा स्मृतिः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदिति ३ समर्थस्य द्वितीयं ब्राह्मणं ।

रेवत्त्रयं शिक्षितव्यमित्यत्र हेतुमाह [illegible]पेक्ष्येति मनुष्याणामेव देवादिभावे प्रमाणमाह तथा हीति
त्रयं शिक्षितव्यमित्यत्र स्मृतिमुदाहरति तस्माच्चेति इतिशब्दो ब्राह्मणसमाप्त्यर्थः श्रीगुरुपरब्रह्मणे

बृं भा० सार्थवादेन विधिना सिद्धमर्थमनुवदति [illegible] इति कथं तस्य सर्वोपासनशेषत्वं तदाहुरात्रागे अल्पत्वा ति
४१२ छेदः समस्तु जरसंदर्भस्य तात्पर्यं कुं भूमिकां करोति नवेति कांडद्वयस्य स्यार्थः अनेन रसंदर्भस्य तात्पर्यमा

[illegible]मादिसाधनत्रयं सर्वोपासनशेषं विहितं दंतो लुब्धो दयालुः सन् सर्वोपासने ष्वाधिक्रियते इति न
निरुपाधिकस्य ब्रह्मणो दर्शनमतिक्रांतमथाप्युनाः सोपाधिकस्य तस्यैवाभ्युदयफलानि वक्तुमानो
वमथोपमारंभः स एष प्रजापतिर्यत् हृदयं प्रजापतिरनुशासनंतरमेवाभिहितः कः पुनरसावनु
शासनप्रजापतिरित्युच्यते एष प्रजापतिः कोसौ यद्धृदयमिति हृदयशब्देन हृदयस्थबुद्धिरुच्यते

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं

[illegible]न शास्त्रस्य ब्राह्मणानेनामरूपकर्मणामुपसंहारउक्तं दिग्विभागद्वारेण तदेतत्सर्वं भूत
नियंसर्वभूतात्मभूतं हृदयं प्रजापतिः प्रजानां स्रष्टृत्वेन ब्रह्म च बृहत्त्वात् सर्वात्मत्वाच्च ब्रह्म एतत्सर्वं
उक्तं पंचमाध्याये हृदयस्य हृदयत्वं सर्वत्वं च तस्माद्यस्मात्तस्मादुपास्यं हृदयं ब्रह्म

माहात्म्येति पापक्षयादिरभ्युदयलक्षणफलानुपासनानीति शेषः अनंतरब्राह्मणमादायतस्यासंगतिमाहेश्वर
शादिना उक्तस्य हृदयशब्दार्थस्य पंचविवर्त्तवर्णं यत्प्रजापतित्वं साधयति यस्मिन्निति कथं हृदयस्य सर्व
त्वं तदाह लोकमिति सर्वत्वसंकीर्तनेन फलमाहात्म्येन तत्सर्वमिति

तत्र हृदयस्योपास्यत्वेसिद्धे सतीतोनन्तफलोक्तिमुखाय्याकरोत्यभिहरंतीति योवेदास्मैविदुषेभिहरंतीतिसं
बंधः वेदनमेवविशदयति स्वा आदि स्वाश्चेना स्वकार्यं रूपदर्शनादिहृदयस्यानुकार्यं करणानिअसंबध्या ज्ञा
तिव्यतिरिक्ताः अविस्मुक्ताः फलेकथयति विज्ञानेनेति अत्रापीतिदकाराक्षरोपासनेपिफलमुच्यतइति

तत्र हृदयनामाक्षरविषयमेवनावदुपासनमुच्यते तदेतद्धृदयमितिनामत्र्यक्षरंत्रीण्यक्षराण्यस्येति त्र्यक्षरंका
निपुनस्तानित्रीण्यक्षराण्युच्यन्ते हृ इत्येकमक्षरमभिहरंतिहृतेराहरतिकर्मणो हृदयेन हृ इत्यभिहितयोवेद
तस्माद्धृदयायब्रह्मणोस्वाश्चेन्द्रियाण्यन्येचविषयाः शब्दादयः स्वंस्वंकार्यमभिहरंति हृदयंचभोक्तृ अर्थमा
हरंस्ततो हृदयनाम्नोहृइत्येतदक्षरमितियोवेदास्मै विदुषेभिहरंतिस्वाश्चान्येयशस्वानचबलिमिति
वाक्यशेषः विज्ञानानुरूपोह्येनफलं तथादइत्येतदप्येकमक्षरमेतद्दानार्थस्यददातेर्दइत्येतद्धृ

तदेतत्त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्य
स्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥१॥ इति पञ्चमं ब्राह्मणम् ॥

यं हृदयनामाक्षरत्वेननिबद्धमत्रापि हृदयायब्रह्मणेस्वाश्च करणान्यन्येचविषयाः स्वंस्वंवीर्यं ददति हृद
यं च भोक्तृ ददातिस्वंवीर्यमतो दकारइत्येवंयोवेदास्मै ददतिस्वाश्चान्येच तथायमित्येतदप्येकमक्षरं यमि
णो गत्यर्थस्यरूपमस्मिन्नाम्निनिबद्धमितियोवेदसः स्वर्गं लोकमेति एवं नामाक्षरादपीदृशं विशिष्टं
फलंप्राप्नोति किमुवक्तव्यं हृदयस्वरूपोपासनादितिहृदयस्तुत्यर्थे नामाक्षरोपन्यासः ॥१॥ इतिपञ्चमं ब्रा॥
ह्मणं

शेषः नामेवफलोक्तिं व्यनक्ति हृदयायेति अस्मै विदुषे स्वाश्चान्ये च ददति बलिमिति शेषः नामाक्षरोपासनात्
त्रीणि हृदयस्वरूपोपासनमेकमितिचत्वार्युपासनान्यत्रविवक्षितानीत्याशंक्याहैवमिति ॥

तस्यैव हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनं विधित्सन्नाह तद्वै तदिति हृदयं ब्रह्म परामृष्टं वै इति स्मरणा र्थं तद्यद्धृदयं ब्रह्म स्मर्यते तदेतल्लक्षणं वक्ष्यते प्रकारान्तरेणेति द्वितीयस्तच्छब्दः किं पुनस्तत्प्र कारान्तरेण एतदेवेति एतेन वक्ष्यते वस्तु यनेन्द्रियप्रत्यक्षं एतदिति वक्ष्यमाणं बुद्धौ सन्निधीकृत्याह आ

ॐ तद्वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद।

सदेव भूत् किं पुनस्तदेतदेवास यदुक्तं हृदयं ब्रह्मेति तदिति तत्र योपलक्षत्त्वाद्विनिर्मुक्तः किं तदिति विशे षतो निर्दिशति सत्यमेव सच्च त्यच्च मूर्तं चामूर्तं च सत्यं ब्रह्म पंचभूतात्मकमित्येतत् स यः कश्चित्सत्या त्मानमेतं महन्महत्त्वाद्यक्षं पूज्यं प्रथमजं प्रथमजातं सर्वस्मात्संसारिणः एतदेवाग्रे जातं ब्रह्मातः प्रथमजं वेद विजानाति

सम

सर्वात्मत्वस्य चतुर्थे सत्ता नतत्तत्त्वयति मूर्तं चेति वेदनमनूद्य फलोक्तिः भवनानुरय निसयहति ए॰॰ १२

प्रथमजत्वं कथमिति तद्वैतस्मादिति सत्यः कश्चिन्न वेदेति संबंधः के मुक्तिकामिदं फलमत आह जयतीति यथा
कृतस्य शत्रोः स्वरूपेण सत्त्वं वारयत्यसन्नेति सयो हैतमित्यादिना य एवमेतदित्यादेरेकोर्थतानुतर

सत्यं ब्रह्मेति तस्येदं फलमुच्यते यथा सत्येन ब्रह्मणा इमे लोका आत्मसात्कृता जिताः एवं सत्या
त्मानं ब्रह्म महद्यक्षं प्रथमजं वेद स जयतीमान् लोकान् किंच जितो वशीकृतः शत्रुरूप यथा ब्रह्म

सत्यं ब्रह्मेति जयतीमांल्लोकान्जित इन्न्वसावसद्य एवमेतं महद्यक्षं
प्रथमजं वेद सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म १ चतुर्थं ब्राह्मणं एवम्

एणासौ शत्रुरिति वाक्यशेषः असच्च असद्भवेदसौ शत्रुर्जितो भवेदित्यर्थः कस्यैतत्फलमिति
पुनर्निगमयति य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति अतो विद्यानुरूपं फलं युक्तं सत्यं
ह्येव यस्माद्ब्रह्मेति १ सप्तमस्य चतुर्थं ब्राह्मणं

शंकिरित्याशंक्याह जयतीति कथमस्य विज्ञानस्येदं फलमित्याशंक्याहानिरिति पंचमस्य प्रथमं सत्यस्य
सत्यं हीति तस्मात् ब्राह्मणमुच्यते

बृ°भा तस्यावांतरसंगतिमाह यइति आहुतीनामेव कर्मसमवायित्वं तत्पातित्वाशंक्याहाग्निहोत्रादिति प

११४ द्रव्याः सोमाद्याहूयमानाः कर्मसमवायित्वमत्र यथा पुनः कालेकथं तासां तथात्वं कर्मणोऽपूर्वायित्वादि

त्याशंक्याह यस्मेति कर्मसमवायित्वमपरित्यज्यैवं स्थितत्वेनापः प्रथमप्रसूताः सत्यः ताः कालं सूक्ष्म

एणाद्दष्टेनात्मनानीति येनात्मनानिष्ठतीनियोजनाआपइति विशेषणं भूतांतरस्ता सेधार्थमिति भूतानि

सत्यस्य ब्रह्मणोऽनुसारार्थमिदमाह यइत्यासुं प्रथमजमित्युक्तं तत्कथं प्रथमजत्वमित्युच्यते आपएवेदम

ग्रआसुरापः पूनिकर्मसमवायिन्यो ग्निहोत्राद्याहुतयोग्निहोत्राद्याहुतेर्द्रवात्मकत्वादस्तु ताश्चापो

ग्निहोत्रादिकर्मापवर्गोत्तरकालके नविरद्दष्टेन सूक्ष्मेणात्मनाकर्मसमवायित्वमपरित्यज्य स्थितान

भूतसहिताएवनकेवलाः कर्मसमवायित्वात्तु प्राधान्यमपामिति सर्वाण्येव भूतानि प्राग्रुत्पत्तेरआ

आपएवेदमग्रआसुस्ताआपः सत्यमसृजंत सत्यं ब्रह्म

कृताव्यक्तानिकर्तृसहितानिनिर्दिश्यंत आपइति ता आपोबीजभूताजगतो व्याकृतात्मनाव [illegible]

स्थितास्ताएवेदं सर्वनामरूपविकृतं जगदग्रे आसुर्नान्यत्किंचित् विकारजातं आसीत्ताः पुनरापः

सत्यमसृजंत तस्मात्सत्यं ब्रह्म प्रथमजं यदेतद्धिरण्यगर्भस्य सूत्रात्मनोजन्म यदव्याकृतस्य

जगतोव्याकरणं तत्सत्यं ब्रह्म कुतो महत्वात् ॥ वारयतीति रति कथं तदाहितासा

मेवकृतानुपादानं तदाह कर्मेति रतितासुमेवात्र ग्रहणमिति शेषः विवक्षितपदार्थनिगमयति सर्वा

एवेति पदार्थमुक्त्वाक्यार्थमाह आइति यथोक्ता आपस्ताएवेति यच्छब्दानुबंधनयोजना सत्यस्तान ए [illegible]

र्मतब्रह्मेति कृतं सत्यं कथं भूतानरसहितात्मा ओङ्कारोजायतेनत्राह इत्यादि तस्य ब्रह्मत्वप्रश्नएवकार्यविशेष्यति तस्य [illegible]

ससस्य ब्रह्मणो महत्त्वं प्रपञ्चद्वारेण साधयति कथमित्यादिना तस्य सर्वस्रष्टृत्वं प्रथम [illegible]रेण [illegible] दर्शितमिह

कथं महत्त्वमित्याह यस्मात्सर्वस्य स्रष्टृ कथं यस्मात्सं ब्रह्म तत्प्रजापतिं प्रजानां पतिं विराजं सूत्रादिकरण मसृजत इत्यनुषंगः प्रजापतिर्देवान्सविराट् प्रजापतिर्देवानसृजत यस्मात्सर्वमेवं क्रमेण सत्याद्ब्रह्मणो जा तं तस्मात्तन्महत्तस्य ब्रह्मकथं पुनः प्राप्तिमित्युच्यते तएवं सृष्टा देवाः पितरमपि विराजमनु तत्सत्यं सम ब्रह्मोपासते ओतएतत्प्रथमजं ब्रह्मसत्यं तस्मात्सर्वात्मनोपास्यं तस्यापि सत्यस्य ब्रह्मणो नाम तदेतत्त्र्यक्ष रं सत्यं कानि तान्यक्षराणीत्याह स इत्येकमक्षरं तीत्येकमक्षरं तीति इकारानुबन्धो निर्देशार्थः यमित्येकमक्षरं तत्

ब्रह्म प्रजापतिं प्रजापतिर्देवान् ते देवाः सत्यमेवोपासते तत्र देतत्त्र्यक्षरं सत्यमिति स इत्येकमक्ष रं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तरे अक्षरे सत्यं मध्यतोऽनृतं तदेतत् दनृतमुभयतः सत्येन परिगृहीतं सत्यभूयमेव भवति नैनं विद्वांसमनृतं हिनस्ति २

तेषां प्रथमोत्तमे अक्षरे सकारयकारौ सत्यं मृत्युरूपाभावात् मध्यतो मध्ये अनृतं अनृतं हि मृत्युः मृत्य नृतयोस्तकारसामान्यात् तदेतदनृतं मृत्युरूपमुभयतः सत्येन सकारलक्षणेन परिगृहीतं व्याप्तमन्तर्भा वितं सत्यरूपाभ्यामतोऽकिंचित्करं तत् सत्यभूयमेव सत्यबाहुल्यमेव भवति एवं सत्यस्य बाहुल्यं सर्वस्य मृत्यो रनृतस्याकिंचित्करत्वं यो वेद विद्वांस्तमेवं विद्वांसमनृतं कदाचित्प्रमादोक्तं न हिनस्ति ॥

तमुपसंहरति तस्मादिति विशेषणात्त्रयोऽसिद्धेः फलितमाह तस्मादिति तस्य फलाय[illegible] दर्शितार्थः बुद्धिपूर्वकमनृतं विद्वानपि वाधकमित्यभिप्रायो दर्शितः प्रमादकृतं [illegible]निरणमाह तम

बृ॰भा॰ ब्राह्मणान्तरमवतार्यमाकरोत्यथोसाविन्द्रो नत्राधिदैविकं स्थानविशेषमुपन्यस्यादित्यादिना ॥
४१५

अथाधुना तस्यैतस्य ब्रह्मणः संस्थानविशेष उपासनमुपदिश्यते तत्किं तद्यत्तत्सत्यं ब्रह्म यत्सत्यं किमसौ नः कोसावादित्यः कः पुनरसावादित्यो य एष करोष एतस्मिन्नादित्यमण्डले पुरुषोभिमानी सोसौ सत्यं ब्रह्म कश्चायमध्यात्मं योयं दक्षिणेऽक्षन्नक्षिणि पुरुषश्च स्थानम् सत्यस्य ब्रह्मणो निर्दिष्टं

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ ।

तावेतावादित्याक्षिस्थौ पुरुषावेकस्यैतस्य सत्यस्य ब्रह्मणः संस्थानविशेषोपलक्षितावन्योन्यस्मिन्नितरेतरस्मिन्नादित्यश्चाक्षुषि चाक्षुष आदित्ये प्रतिष्ठितावध्यात्माधिदैवतयोरन्योन्योपकार्योपकारकत्वात्

संप्रत्याध्यात्मिकं स्थानविशेषं दर्शयति पश्चैति प्रदेशभेदव्यतिरेकेण स्थानभेदं दर्शयन्नादर्शकमाह
तद्येमाविति

अन्योन्यमुपकार्योपकारकत्वेनान्योन्यस्मिन् प्रतिष्ठितत्वं प्रश्नपूर्वकं प्रकटयति कथमित्यादिना प्राणैश्चक्षु
रादिभिरिन्द्रियैरिति यावत् अनुगृह्णन्नादित्यमंडलात्मानं प्रकाशयन्नित्यर्थः प्रासंगिकमुपास
नामसंगतमित्यर्थः तत्प्रदर्शनस्य किं फलमित्याशंक्याह कथमिति पुरुषद्वयस्यान्योन्यमुपकार्योपकारकत्वमुक्तं नि
श्चयं प्रतिष्ठितत्वानिरूपयते रश्मिभिः प्रकाशेनानुग्रहं कुर्वन्नेष आदित्योऽस्मिंश्चाक्षुषे [illegible] प्रतिष्ठितः
